दिनाङ्क :-12.11.2024

प्रात: - 06:55

<u>झारखण्डम्/विधासभानिर्वाचनप्रचारः</u>

झारखण्ड-राज्ये विधानसभानिर्वाचनस्य प्रथमस्य चरणस्य कृते प्रचाराभियानं ह्यः सम्पन्नम् अभवत्। अस्मिन् चरणस्य मतदानम् अस्मिन् मासे त्रयोदशदिनाङ्के त्रिचत्वारिंशन्निर्वाचनक्षेत्रेषु भविष्यति। दल-प्रचारकाः स्वपक्षस्य अभ्यर्थिनां कृते मतदातृन् आक्रष्टुम् अन्तिमप्रयासान् कृतवन्तः। भाजपा-दलस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्रमोदी ह्यः झारखण्ड-राज्ये भाजपा-कार्यकर्तृभिः सह 'मेरा बूथ सबसे मजबूत' इत्यभियानस्य अन्तर्गतं संवादम् अकरोत्। झारखण्ड-राज्यस्य द्रुतविकासाय द्विगुणित-शक्तियुतस्य सर्वकारस्य आवश्यकता अस्ति इति श्रीमोदी अवदत्। दलस्य संघटनात्मक-क्षमतायाः उल्लेखं कुर्वन् प्रधानमन्त्री अवदत् यत् भाजपा-दलं स्वयमेव सङ्घटनाधारेण विनिर्मितम् अस्ति, अतः तस्य निर्वाचनपद्धतिः सङ्घटनस्य कार्यकर्तृणां च आधारेण भवति।

<u>राष्ट्रपतिः/यात्रा</u>

राष्ट्रतिः द्रौपदी-मुर्मूः अद्य केन्द्रशासित-प्रदेशयोः दादरानगरहवेली-दमनदीवयोः त्रि-दिवसीय-यात्रार्थं प्रतिष्ठते। तत्र सा अनेकविध-कार्यक्रमेषु सहभागं करिष्यति ।

<u>राष्ट्रपतिः/मुख्यन्यायाधीशः</u>

न्यायमूर्तिः सञ्जीव-खन्ना ह्यः भारतस्य एकपञ्चाशत्तम-मुख्यन्यायाधीश-रूपेण शपथवचनं स्वीकृतवान्। राष्ट्रपतिना द्रौपदीमुर्मु-इत्यनया राष्ट्रपतिभवने एकस्मिन् समारोहे न्यायमूर्तये संजीव-खन्ना इत्यस्मै पदगोपनीयतायै शपथः ग्राहितः। संजीवखन्ना मुख्य-न्यायाधीशस्य डी.वाई.चन्द्रचूडस्य स्थानापन्नः अस्ति, यः परह्यः कार्यालयात् निवृत्तः अभवत्। उपराष्ट्रपतिः जगदीप-धनखडः, प्रधानमन्त्री नरेन्द्रमोदी, अनेके केन्द्रीयमन्त्रिणः सर्वोच्चन्यायालयस्य न्यायाधीशाः च अस्मिन् समारोहे उपस्थिताः आसन्। अनन्तरम्, अभिनव-मुख्यन्यायाधीशस्य सम्माननने राष्ट्रपतिना रात्रिभोजस्य आयोजनं कृतम्।

<u>प्रधानमन्त्री/रूसः</u>

रूस-देशस्य प्रथमः उपप्रधानमन्त्री डेनिस-मण्टुरोवः गतवासरे प्रधानमन्त्रिणं नरेन्द्र-मोदिनम् अमिलत्। संभाषणावधौ उभौ नेतारौ आर्थिकसंबन्ध-संचारोर्जादि-विषयेषु चर्चितवन्तौ।

प्रधानमन्त्री/स्वामिनारायणमन्दिरम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतीय-युवकानां क्षमतायाः विषये सम्पूर्णं जगत् आकृष्टम् अस्ति। सः अवदत् यत् अद्यत्वे विश्वस्य अनेके नेतारः स्वदेशे कार्यार्थं कुशलजनशक्तियुतान् भारतीय-युवकान् अपेक्षन्ते। श्रीमोदी गतदिने गुजरातस्य वड्ताल-नगरे श्रीस्वामिनारायण-मन्दिरस्य द्विशततम-वर्षपूर्तिम् अभिलक्ष्य आयोजिते कार्यक्रमे सम्बोधयन् आसीत्। सः अवदत् यत् भारतस्य यूनां कृते वैश्विकाग्रहः इतोऽपि एधिष्यते। सः अवदत् यत् भगवता स्वामिनारायणेन द्विशत-वर्षपूर्वं स्थापितस्य 'वड्डल्-धाम' इत्यस्य आध्यात्मिक-चेतनां जनाः अनुभूतवन्तः। श्रीमोदी अवदत् यत् अयं अवसरः भारतीयसंस्कृतेः सार्वकालिकप्रवाहस्य प्रमाणम् अस्ति। प्रधानमन्त्रिणा देशवासिनः विकसितभारतस्य सङ्कल्पं स्वीकृत्य आगामि-पञ्चविंशति-वर्षेषु तं साधयितुं सक्रियरूपेण योगदानाय आग्रहीताः। सः नूतनावधेः कुशल-कर्मचारिणां विकासाय सर्वकारस्य महत्त्वपूर्णान् प्रयत्नान् उल्लेखितवान्। प्रधानमन्त्री शिक्षायाः, कौशलविकासस्य व्यसनमुक्तेः च क्षेत्रेषु स्वामिनारायणपथस्य उल्लेखनीय-योगदानं प्रशंसितवान्।

अमितशाहः/परियोजनाः

केन्द्रीयगृहमन्त्रिणः अमितशाहस्य अध्यक्षतायाम् एकया उच्चस्तरीय-समित्या छत्तीसगढ-ओडिशा-पश्चिमबंगाल-राज्यानां कृते न्यूनातिन्यूनं षड्विंशत्यधिक-सप्तशत-कोटिरूप्यकाणां तिस्रः परियोजनाः स्वीकृताः। एतेषां परियोजनानां अनुमोदनं राज्येषु अग्निशमन-सेवानां विस्ताराय आधुनिकीकरणाय च कृतमस्ति।

भारतीयान्ताराष्ट्रिय-चलच्चित्र-महोत्सवः

भारतीयान्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य आई.एफ्.एफ्.आई.-इत्यस्य पञ्चपञ्चाशत्तमं संस्करणं नवम्बर-मासस्य विंशति-दिनाङ्कात् गोवायां समारप्स्यते।

।।इति वार्ता:।।